# Shri Bala Duhsvapnanashaka Kavacham 4

# શ્રીબાલા દુઃસ્વપ્નનાશકકવચમ્ ૪

## Document Information

Text title : Shri Bala Duhsvapnanashaka Kavacham 4

File name : bAlAduHsvapnanAshakakavacham4.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલા દુઃસ્વપ્નનાશકકવચમ્ ૪

બાલાર્કમણ્ડલાભાસાં ચતુર્બાહું ત્રિલોચનામ્ ।
પાશાઙ્કુશવરાભીતીર્ધારયન્તીં શિવાં ભજે ॥ ૧॥

પુર્વસ્યાં ભૈરવી પાતુ બાલા માં પાતુ દક્ષિણે ।
માલિની પશ્ચિમે પાતુ વાસિની ચોત્તરેઽવતુ ॥ ૨॥

ઊર્ધ્વં પાતુ મહાદેવી શ્રીબાલા ત્રિપુરેશ્વરી ।
અધસ્તાત્ પાતુ દેવેશી પાતાલતલવાસિની ॥ ૩॥

આધારે વાગ્ભવઃ પાતુ કામરાજસ્તથા હૃદિ ।
મહાવિદ્યા ભગવતી પાતુ માં પરમેશ્વરી ॥ ૪॥

ઐં લં લલાટે માં પાયાત્ હ્રૌં હ્રીં હંસશ્ચ નેત્રયોઃ ।
નાસિકાકર્ણયોઃ પાતુ હ્રીં હ્રૈં તુ ચિબુકે તથા ॥ ૫॥

સૌઃ પાતુ મે હૃદિ ગલે હ્રીં હ્રઃ નાભિદેશકે ।
સૌઃ ક્લીં શ્રીં ગુહ્યદેશે તુ ઐં હ્રીં પાતુ ચ પાદયોઃ ॥ ૬॥

હ્રીં ક્લીં માં સર્વતઃ પાતુ સૌઃ પાયાત્ પદસન્ધિષુ ।
જલે સ્થલે તથા કોશે દેવરાજગૃહે તથા ॥ ૭॥

ક્ષેં ક્ષેં માં ત્વરિતા પાતુ માં ચક્રી સૌઃ મનોભવા ।
હંસૌઃ પાયાન્મહાદેવી પરં નિષ્કલદેવતા ॥ ૮॥

વિજયા મઙ્ગલા દૂતી કલ્પા માં ભગમાલિની ।
જ્વાલામાલિની નિત્યા સર્વદા પાતુ માં શિવા ॥ ૯॥

ઇતીદં કવચં દેવિ દેવાનામપિ દુર્લભમ્ ।
તવ પ્રીત્યા સમાખ્યાતં ગોપનીયં પ્રયત્નતઃ ॥ ૧૦॥

ઇદં રહસ્યં પરમં ગુહ્યાદ્ગુહ્યતરં પ્રિયે ।
ધન્યં પ્રશસ્યમાયુષ્યં ભોગમોક્ષપ્રદં શિવમ્ ॥ ૧૧॥

ઇતિ શ્રીબાલા દુઃસ્વપ્નનાશકકવચં (૪) સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Duhsvapnanashaka Kavacham 4*
pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*